## कोपधाच्च । (१३७/१५१७)

ककारोपधात् प्रातिपदिकाद् [1]अण् प्रत्ययो भवति यथायोगं विकारावयवयोरर्थयोः । अञोऽपवादः । तर्कु – तार्कवम् । तित्तिडीक-तैत्तिडीकम् । [2]माण्डूकम् । दार्दुरूकम् । माधूकम् ॥

## त्रपुजतुनोः षुक् । (१३८/१५१८)

त्रपुजतुशब्दाभ्यामण् प्रत्ययो भवति विकारे, तत्सन्नियोगेन तयोः षुगागमो भवति । ओरञोऽपवादः । त्रपुणो विकारः त्रापुषम् । जातुषम् । अप्राण्यादित्वान्नावयवे ॥

## ओरञ् । (१३९/१५१९)

उवर्णान्तात् प्रातिपदिकात् अञ् प्रत्ययो भवति विकारावयवयोरर्थयोः । अणोऽपवादः । अनुदात्तादेरन्यदिहोदाहरणम् ।[3]दैवदारम् । [4]भाद्रदारवम् ॥

## अनुदात्तादेश्च । (१४०/१५२०)

अनुदात्तादेः प्रातिपदिकात् अञ् प्रत्ययो भवति विकारावयवयोरर्थयोः । अणोऽपवादः । [5]दाधित्थम् । [6]कापित्थम् । [7]माहित्थम् ॥

## पलाशादिभ्यो वा । (१४१/१५२१)

पलाशादिभ्यः [8]प्रातिपदिकेभ्यः वा अञ् प्रत्ययो भवति विकारावयवयोरर्थयोः । पालाशम् । खादिरम् । [9]यवासम् । उभयत्र विभाषेयम् । पलाशखदिरशिंशपास्पन्दनानामनुदात्तादित्वात् प्राप्ते, [10]अन्येषामप्राप्ते ।

पलाश । खदिर । शिंशपा । स्पन्दन । करीर । शिरीष । [11]यवास । विकङ्कत । पलाशादिः ॥

## शम्याष्ट्लञ् । (१४२/१५२२)

शमीशब्दाट् ट्लञ् प्रत्ययो भवति विकारावयवयोरर्थयोः । अञोऽपवादः । शामीलं भस्म । शामीली [12]स्रुक् ॥

---

1. च इत्यधिकम् क. ह. 2. मारयूकं क. 3. देवदारवम् ह. 4. नास्ति इ, माह्यदारवम् ह. 5. दधित्थ इत्यधिकम् ब. क. इ. ड. 6. कपित्थ इत्यधिकम् ब. क. इ. ग. 7. महित्थ इत्यधिकम् ब. क. इ. ड, माहित्थम् नास्ति ह. 8. प्रातिपदिकेभ्यः नास्ति फ. 9. नास्ति फ. 10. शेषाणाम् ब. 11. मूलास ब, पूयलाश क. पनास इ, पूलाश इ, पुलास फ. 12. समिध् ग.